**दीक्षित** त्रि॰ दीक्ष–कर्त्तरि क्त दीक्षा जाताऽस्य तार॰ इतच् वा । १सोमादियागाङ्गव्रतभेदधारिणि २संजाततन्त्रोक्त दीक्षे च दीक्षाशब्दे उदा॰। "वर्णानां ब्राह्मणश्चापि विशेषेण दीक्षितो द्विजः" भा॰अनु॰६।८श्लो॰ "अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् । भोभवत्पूर्वकन्त्वेनम- भिभाषेत धर्मवित्" "नाक्रामेत् कामतश्छायां बभ्रुणो दीक्षितस्य च" मनुः । ३काम्पिल्लनगरस्थविप्रभेदे तत्कथा "आसीत् काम्पिल्लनगरे सोमयाजिकुलोद्भवः । दी- क्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदः । वेदवेदाङ्ग वेदार्थवेदोक्ताचारचञ्चुरः । राजमान्यो बहुधनो वदान्यः कीर्त्तिभाजनम् । अग्निशुश्रूषणरतो वेदाध्ययनतत्परः" काशीख॰ १३अ॰ । स दीक्षितः अयनं यस्याः गौरा॰ ङीष्। दीक्षितायनी तत्पत्न्यां स्त्री "महापतिव्रतां सम्यक् पत्नीं प्रोवाच तामथ । दीक्षितायनि ! कुत्रासि क्व ते गुणनिधिः सुतः । अथ तिष्ठतु किन्तेन क्व सा मम शुभोर्मिका । अङ्गोद्वर्त्तनकाले या त्वया मेऽङ्गुलितो हृता । नवरत्नमयीं शीघ्रं तामानीय प्रयच्छ मे । इति श्रुत्वाथ तद्वाक्यं भीता सा दीक्षितायनी" काशीख॰ १३अ॰ यज्ञमाले ४संजातदीक्षे च । "संग्रामाध्वर- दीक्षितो नरपतिः पत्नी गृहीतव्रता" वेणीसं॰ "दीक्षितो न ददाति" श्रुतिः ।

**दीक्षितृ** त्रि॰ दीक्ष–शीलार्थे युचं बाधित्वा तृच् । दीक्षाशीले

**दीति** स्त्री दीप–क्तिन् वेदे पलोपः । दीप्तौ "सुदीतिरस्मा- दिव्यं भ्यः" ता॰ब्रा॰१६।११ "सुदीतिः सुदीप्तिरग्नि" भा॰।

**दीदि** पु॰ दीप बा॰ दि–पृषो॰ । द्योतमाने । "अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता" ऋ॰ १।१५।११ दीद्यग्नी द्योतमानाग्नियुक्तौ" भा॰

**दीदिवि** पु॰ दिव–क्विन् अभ्यासे तस्य दीर्घः वलि वलोपः । १स्वर्गे २मद्ये च उज्ज्वल॰ । ३अन्ने अस्त्री अमरः । पुनः- पुनर्भृशं वा दीव्यति दिव–यङ्लुक् इन् न गुणः अभ्यासदीर्घः । ४पुनःपुनर्भृशं वा द्योतने त्रि॰ "राज- न्तमध्वराणां गोपामृतस्य दीदिविम्" ऋ॰१।१।८ "दीदि- विम् पुनःपुनर्भृशं वा द्योतकम्" भा॰

**दीधिति** स्त्री दीधी–क्तिन् ग्रहादित्वादिट् "यीवर्णयोर्दीधि- वेव्योः" पा॰ इकारलोपश्च । १किरणे "सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् । क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तः" वृ॰सं॰ "पुपोष वृद्धिं हरिदश्वदीधितेः" रघुः "अमृतदीधितिरेष विदर्भजे!" नैष॰ । "स्वाधःसुधादीधितिमानन्ति" शि॰शि॰ २रघुनाथ- शिरोमणिकृते चिन्तामणिटीकाभेदे ३अङ्गुलौ निघण्टुः ।

**दीधितिकृत्** पु॰ दीधितिं कृ–क्विप् । चिन्तामणिटीकाभेद- कारके रघुनाथशिरोमणिपण्डिते

**दीधितिमत्** पु॰ दीधितयः भूम्ना सन्त्यस्य मतुप् । १सूर्ये "शरदां सुप्तपद्मानां प्रातर्दीधितिमानिव" । "शरद्ध- नात् दीधितमानिवोत्थः" कुमा॰ । २अर्कवृक्षे च ।

**दीधी** देवने दीप्तौ च अदा॰ अत्मा॰ आत्म॰ अक॰ सेट् । दीधीते अदीधिष्ट । दीध्यौ दीध्याञ्चक्रे । दीधिता दीधिष्यते दीधितिः । "दीधीवेवीसमः कश्चिद्गुणवृद्ध्यो- रभाजनम्" सा॰ द॰ ।

**दीन** त्रि॰ दी–क्त तस्य नः । १दुःखिते अमरः । २भीते च । ३तगरपुष्पे न॰ ४मूषिकायां स्त्री मेदि॰ । "यदासुदेवे- नादीनमनादीनवर्मीरितम्" माघः । "दिनानि दीनो- द्धरणोचितस्य" रघुः ।

**दीनदयालु** पु॰ दीने दयालुः । दुःखिते १दयालौ "दीनद- यालुतयाऽवनिपालः" नैष॰ ।

**दीननाथ** ६त॰ । दुःखितजनभर्त्तरि ।

**दीनार** पु॰दी–आरक् नुट् च । १स्वर्णभूषणे २मुद्रायां ३सुवर्ण- कर्षद्वये ४निष्कमाने अमरभरतौ । "दीनारोरोपकैर- ष्टाविंशत्या परिकीर्त्तितः । सुवर्णसप्ततितमोभागोरोपक उच्यते" विष्णुगुप्तोक्ते सप्ततांशाधिकहेमरत्तिकाद्रूप- रोपकैरष्टाविंशत्या परिमिते ५द्वात्रिंशद्रत्तिकामिते हेम्नि च प्राय॰त॰ रघुः ।

**दीप** दीप्तौ दि॰आत्म॰अक॰सेट् । दीप्यते अदीपि–अदीपिष्ट । दिदीपे दीप्तः । णिच् अदीदिपत्–त अदिदीपत् त । दीप्तिः । दीपनं दीपकः दीप्रः । "दीप्यमानः स्वतेजसा" मनुः । "पुनर्दिदीपे मदढुर्द्दिनश्रीः" रघुः "देवाद्रवेव्य- दीपिष्ट" "सधूमदीप्राग्निरुचीनि रेजुः" भट्टिः "ततः शकुनयो दीप्ताः मृगाश्च क्रूरभाषिणः" हरिवं॰१७१ अ॰ । "हिंस्रेषु दीप्तास्त्रधरः कुमारः" भट्टिः "यावत् कर्माणि दीप्यन्ते तावत् संसारवासनाः" कुलार्ण॰ उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्ते तदर्थे "आदित्यदादीप्तकशा- नुकल्पम्" भट्टिः "यस्य यद्र्तेतः प्रथमसुददीप्यत" ऐत॰ब्रा॰ ३।३४ "क्रुध्यन्ति परिदीप्यन्ति भूमिजस्याधिक्षिते" भा॰ भा॰ २०३६ श्लो॰ आर्षः पदव्यत्ययः । "ते शराः स्वस- मुत्थेन प्रदीप्ताखिलभानुना" भा॰ उ॰१८१ अ॰

**दीप** पु॰ दीपयति स्वं परञ्च दीप–णिच्–अच् । स्वपर-